National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 08-09
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Thahira P.**
Associate Professor,
Department of Sanskrit,
Sree Neelakanta Govt. Sanskrit-College, Pattambi,
Affiliated to University of Calicut,
Palakkad, Kerala, India

**Correspondence:**
**Dr. Thahira P.**
Associate Professor,
Department of Sanskrit,
Sree Neelakanta Govt. Sanskrit-College, Pattambi,
Affiliated to University of Calicut,
Palakkad, Kerala, India

# "पत्युर्नो यज्ञसंयोगे" इति सूत्रे निहितः स्त्रीस्थानविमर्शः – सामाजिकभाषाशास्त्रीयं विश्लेषणम्।

**Dr. Thahira P.**

**मुख्यशब्दः-** पाणिनीयव्याकरणम्, पत्युर्नो यज्ञसंयोगे, पत्नी, यज्ञसंयोगः, सामाजिकभाषाशास्त्रम्।

**सारसंक्षेपः -** अयं प्रबन्धः अष्टाध्याय्याः "पत्युर्नो यज्ञसंयोगे" (४।१।३३) इति सूत्रस्य सामाजिकभाषाशास्त्रीयदृष्ट्या विश्लेषणं करोति। पाणिनीयव्याकरणं केवलं शब्दरूपनिर्माणस्य नियमसंग्रहः न, अपि तु तत्कालीनसामाजिक-सांस्कृतिकव्यवस्थायाः सूक्ष्मप्रतिबिम्बः इति अस्मिन् अध्ययनस्य उद्देशः। "पति" इति शब्दात् "पत्नी" इति स्त्रीलिङ्गरूपस्य निष्पत्तिः स्त्रीप्रत्ययविधानस्य माध्यमेन कथं भवति, तस्य व्याकरणिकप्रक्रिया च अत्र निरूपिता। तथा च, यज्ञसंयोगे पत्नीशब्दस्य प्रयोगे दाम्पत्योः सहाधिकारत्वं कथमिति च प्रतिपाद्यते।

उपक्रमः।

संस्कृतव्याकरणस्य इतिहासे अष्टाध्यायी अद्वितीयं स्थानं अलङ्करोति। अस्य ग्रन्थस्य वैशिष्ट्यं केवलं शब्दसंरचनायाः नियमबद्धता न, अपि तु तस्य सामाजिक-सांस्कृतिक-संरचनानां सूक्ष्मप्रतिबिम्बनम् अस्ति। शब्दाः समाजस्य दर्पणाः भवन्ति, तथा च व्याकरणं तेषां दर्पणानां विन्यासशास्त्रम्। "पत्नी" इति शब्दस्य पाणिनीयदृष्ट्या व्युत्पत्तिः स्त्रीप्रत्ययविधानस्य उत्कृष्टं उदाहरणं ददाति। अतः अयं प्रबन्धः अष्टाध्याय्यां पत्नीसङ्कल्पस्य व्याकरणिकं, सामाजिकं च विश्लेषणमत्र प्रस्तौतूयते ।

स्त्रीप्रत्ययविधानम्।

अष्टाध्याय्याः चतुर्थाध्याये प्रथमे पादे स्त्रीप्रत्ययानां विधानं विस्तरेण दृश्यते। पाणिनिः "स्त्रियाम् (४.१.३)" इति अधिकारसूत्रेण स्त्रीप्रत्ययानां स्वरूपं निर्दिशति। एतदधिकारस्य अधीनत्वे चाप्, टाप्, डाप्, ङीप्, ङीन्, ङीष् इति प्रत्ययाः विहिताः। स्त्रीप्रत्ययानां प्रयोजनं केवलं लिङ्गपरिवर्तनं न, अर्थविशेषस्य प्रकाशनम् अप्येव। स्त्रीप्रत्ययैः स्त्रीलिङ्गरूपनिर्माणेन सामाजिकभूमिकायाः स्थितिः च भाषायां रूढमूला भवन्ति। यथा आचार्यः/ आचार्यानी, इन्द्रः/इन्द्राणी तथा पति/पत्नी इत्यादयः शब्दयुग्मानि व्याकरणिकरूपान्तरणैः सह सामाजिकव्यवस्थायाः अभिव्यक्तकाः च भवन्ति।

पाणिनिः विवाहः इत्यर्थे उपयमनशब्दः प्रयुक्तः[i]। विवाहसंस्कारस्य पूर्णता कन्यायाः हस्तग्रहणेनैव सम्भवति।

> **'गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।**
> **भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः'।।**[ii] (ऋग्वेदः १०.८५.३६)

अत एव पाणिनिना विवाहस्य पर्यायरूपेण हस्तेकृत्य, पाणौकृत्य इति शब्दद्वयम् उल्लिखितम्। यथा 'नित्यं हस्ते पाणावुपयमने' (१-४-७७) इति। मनुमते पाणिग्रहणद्वारा विवाहः सवर्णस्त्रियः एव भवति। तदुक्तं 'पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते'[iii] इति। पत्नीशब्दस्य निष्पादनार्थं भवति पत्युर्नो यज्ञसंयोगे इति सूत्रम्।

**पत्युर्नो यज्ञसंयोगे (४-१-३३)**

पत्युः नः यज्ञसंयोगे इति पदच्छेदः। पतिशब्दस्य नकारादेशः स्यात् यज्ञेन सम्बन्धे इति सूत्रस्यार्थः। पतिशब्दात् स्त्रीत्वे द्योत्ये यज्ञसम्बन्धे नकारादेशः भवति इति। यज्ञेन संयोगः यज्ञसंयोगः। अस्य शब्दस्य अर्थद्वयं स्वीकर्तुं शक्यते। यथा प्रथमं तावत् सामान्यरूपेण यज्ञकर्मणि यजमानेन सह या तत्र उपविशति, या यज्ञफलस्य अधिकारिणी भवति इत्यर्थः। स्वर्गकामः इति पुल्लिङ्गे उक्तत्वात् यज्ञकर्मणि पुरुषस्यैवाधिकारः। किन्तु दम्पत्योः सहाधिकारात्, वसिष्ठकृतयज्ञस्य न केवलं वसिष्ठस्यैव फलभोक्तृत्वं वसिष्ठस्त्रियः अपि फलभोक्तृत्वमस्ति। यज्ञस्य प्रधानं फलं यजमानस्य पत्नी अपि परिगृह्णाति। सूत्रे न्यासव्याख्याने एवमप्यस्ति यथा – "शूद्रस्यैव तावद्यज्ञेऽनधिकृत्वाद्यज्ञेन संयोगो नास्ति, किं पुनस्तद्भार्यायाः? अतः वृषलस्य पत्नी इत्येष प्रयोगो नोपपद्यते इति। उपमानाद्भविष्यति इति। पत्नीवद्धि पत्नी। यथैव हि यजमानस्य पत्यग्निसाक्षिपूर्वकेण तत्पत्युः सम्बन्धिनी तत्कार्येषु चाधिकृता तथा वृषलस्य भार्याऽपि। तस्मात् पत्नीसमाधर्म्यात् साऽपिपत्नीत्युच्यते" इति।

द्वितीयं तु विवाहसमये गार्हपत्याग्निं साक्षीकृत्य यस्याः पाणिग्रहणं क्रियते, सा अपि पत्नी इति नाम्नि व्यवह्नियते।

**पत्नी शब्दस्य पाणिनीयनिष्पत्तिः।**

"पति" इति शब्दः सामाजिकरूपेण दाम्पत्यसम्बन्धस्य मूलतत्त्वं सूचयति। तस्य स्त्रीरूपं "पत्नी" इति ङीप् प्रत्ययेन सिद्ध्यति। एषा प्रक्रियया दर्शयति यत् संस्कृतभाषायां लिङ्गपरिवर्तनं नियमबद्धं, संरचनात्मकं, तथा अर्थसम्बद्धं च अस्ति। "पति" इति शब्दः स्वामी, रक्षकः, भर्ता इत्यर्थेषु प्रयुज्यते। तस्य स्त्रीरूपनिर्माणे ङीप् प्रत्ययः प्रयुज्यते। पत्युर्नो यज्ञसंयोगे (४-१-३३) इति सूत्रम्। अलोऽन्त्यस्य[iv] इति परिभाषया अन्त्यस्य इकारस्य स्थाने नकारादेशे कृते पत्न् इति शब्दात् ऋन्नेभ्यो ङीप् (४-१-५)[v] इति सूत्रेण ङीपि अनुबन्धलोपे स्वादिकार्ये पत्नी इति शब्दः। पाणिनिः प्रत्ययानां माध्यमेन सामाजिकभूमिकानां वर्गीकरणं सूक्ष्मतया निरूपयति। अतः पत्नीसङ्कल्पः व्याकरणे, समाजे, भाषायां च त्रिषु स्तरिषु कथमिति अवगन्तुं शक्यते।

**भाषावैज्ञानिकदृष्ट्या विश्लेषणम्।**

भाषाविज्ञानदृष्ट्या "पत्नी" शब्दः व्युत्पत्तिशास्त्रस्य, रूपविज्ञानस्य, तथा समाजभाषाशास्त्रस्य च समग्रताऽस्ति। स्त्रीप्रत्ययप्रयोगे अवगम्यते यत् संस्कृतभाषा लिङ्गनिर्देशे अत्यन्तं सूक्ष्मा भवति इति। यद्यपि लिङ्गं जैविकं, तथापि व्याकरणनिष्पत्तिप्रकारकं च। "पति", "पत्नी" इत्येतयोः शब्दयोः अस्तित्वं परस्पराश्रितमेव। अतः भाषिकरूपेण दाम्पत्यं द्विपक्षीयसंरचना इति सूच्यते। भारतीयसंस्कृतौ विवाहः केवलं व्यक्तिगतः सम्बन्धः न, अपि तु सामाजिकसंस्था च। स्त्रीप्रत्ययविधानम् एतत् सूचयति यत् समाजे स्त्रीणां विशिष्टः परिचयः भाषायां विधिवत् प्रतिष्ठापितः अस्ति। पाणिनिः भाषायाः यथावत्प्रचलितरूपमेव सूत्रैः बद्धवान्। सः समाजस्य द्रष्टा आसीत्, न तु तस्य नियन्ता। "पत्नी" इति शब्दः दार्शनिकदृष्ट्या अपि विचारणीयः। संस्कृतपरम्परायां दाम्पत्यं "अर्धाङ्गिनी" इति संज्ञया निरूप्यते, या पत्या सह आध्यात्मिकसहयात्रिणी च भवति। अतः शब्दव्युत्पत्तिः जीवनदर्शनस्य भाषाप्रकाशनमप्येव।

**उपसंहारः।**

अष्टाध्याय्यां पत्युर्नो यज्ञसंयोगे (४-१-३३) इति सूत्रस्य अध्ययने, "पत्नी" शब्दस्य अध्ययने च अवगतं यत् पाणिनीयव्याकरणं केवलं भाषापरं न, अपि तु सामाजिक-सांस्कृतिक-दार्शनिकपरं च भवति। "पति" इत्यस्मात् "पत्नी" इति रूपपरिवर्तनं लघु व्याकरणिकप्रक्रिया इव दृश्यते, किन्तु तस्य अन्तर्निहितः अर्थः विशालः भवति। अनेन स्पष्टं भवति यत् व्याकरणं भाषा-विज्ञानस्य समाजदर्शनस्य च साधनम् इति।

**सन्दर्भ**

I. विभाषोपयमने १-२-१६

II. ഋഗ്വദേപ്രവശേിക,വദേബന്ധു,കരേള സാഹിത്യ അക്കാദമി, തൃശൂർ, पृ २७८

III. मनु ३/४३

IV. अलोऽन्त्यस्य(१.१.५२)-षष्ठीनिर्दिटस्यान्त्यस्याल आदेशः स्यात्। वैयाकरणसिद्धान्तकौमुदी-परिभाषाप्रकरणम्-४२, भट्टोजिदीक्षितः, चौखम्भा प्रकाशन, पोस्ट बाक्स नं ११५०,२०१८।

V. ऋन्नेभ्यो ङीप् (४-१-५) ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप्स्यात्। वैयाकरणसिद्धान्तकौमुदी-अजन्तस्त्रीलिङ्गप्रकरणम्-३०६, भट्टोजिदीक्षितः, चौखम्भा प्रकाशन, पोस्ट बाक्स नं ११५०,२०१८।

**ग्रन्थसूची-**

१. पाणिनिकालीन भारतवर्ष, वासुदेवशरण अग्रवाल,चौखम्बा विद्याभवन, वाराणसी-१९९६.

२. पाणिनीय व्याकरणे स्त्रीप्रत्ययानामध्ययनम्, डॉ शिवकान्त झा, हंसा प्रकाशन, किशनपोल बाजार, जयपुरः ३०२००१, प्रथम संस्करण१९९४, ऐ एस् बि एन् ८१-८६१२०-०४-१.

३. पाणिनीयव्याकरण में स्त्रीप्रत्ययार्थमीमांसा, डाँ महेशचन्द्र, चौखम्भा पब्लिशर्स, गोकुल भवन, के-३७/१०९, वाराणसी-२२१००१, २०१७.

४. वैयाकरणसिद्धान्तकौमुदी- भट्टोजिदीक्षितः, चौखम्भा प्रकाशन, पोस्ट बाक्स नं ११५०,२०१८।